# Shri Ganesha Stuti Shryonkarakrita

# શ્ર્યોઙ્કારાકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Shryonkarakrita

File name : gaNeshastutiHshryonkArAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 6 | 8.6 49-62||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# શ્ર્યોઙ્કારાકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
શ્ર્યોઙ્કારાવૂચતુઃ ।
નમસ્તે ગણનાથાય સર્વસિદ્ધિપ્રદાયક ।
સિદ્ધિબુદ્ધિયુતાયૈવ ગણાનાં પતયે નમઃ ॥ ૪૯ ॥
સ્વાનન્દપતયે તુભ્યં કર્તૄણાં કર્તૃરૂપિણે ।
અનાથાય સનાથાનાં નમો નાથાય તે નમઃ ॥ ૫૦ ॥
પરેશાય પરેષાં ચ પાલકાય પરાત્મને ।
આત્મનામમૃતાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૫૧ ॥
લમ્બોદરાય દેવાય દેવદેવેશરૂપિણે ।
દેવેભ્યો દેવતાં દાત્રે ગજાનનાય તે નમઃ ॥ ૫૨ ॥
જ્યેષ્ઠરાજાય સર્વેષામાદિપૂજ્યાય ઢુણ્ઢયે ।
અનામનાય નિત્યાય સર્વેશાય નમો નમઃ ॥ ૫૩ ॥
બ્રહ્મભ્યો બ્રહ્મદાત્રે તે બ્રહ્મણે બ્રહ્મરૂપિણે ।
બ્રહ્મણસ્પતયે તુભ્યં પૂર્ણયોગાય તે નમઃ ॥ ૫૪ ॥
યોગશાન્તિમયાયૈવ ચિન્તામણિસ્વરૂપિણે ।
અનન્તાયાદિરૂપાય ચાન્તઃસ્થાય નમો નમઃ ॥ ૫૫ ॥
કિં સ્તુવસ્ત્વાં ગણાધીશ યોગશાન્તિધરં પરમ્ ।
યત્ર વેદાદયઃ શાન્તિં પ્રાપ્તા યોગપરાયણાઃ ॥ ૫૬ ॥
મનોવાણીમયો નૈવ મનોવાણીવિવર્જિતઃ ।
નૈવ ત્વં તે નમો નાથ પ્રસન્નો ભવ સર્વદા ॥ ૫૭ ॥
એવમુક્ત્વા ગણાધીશં પ્રણેમતુર્મહાસુર ।
શ્ર્યૌઙ્કારૌ તૌ સમુત્થાપ્ય જગાદ ગણનાયકઃ ॥ ૫૮ ॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
વરાન્ બ્રૂતં મહાભાગે મહામાયે હૃદીપ્સિતાન્ ।

દાસ્યામિ તપસા તુષ્ટઃ સ્તોત્રેણાહં વિશેષતઃ ॥ ૫૯॥
સ્તોત્રં ભવત્કૃતં મે વૈ સર્વસિદ્ધિપ્રદાયકમ્ ।
પઠતે શ઼ૃણ્વતે નિત્યં પ્રભવેદ્ભુક્તિમુક્તિદમ્ ॥ ૬૦॥
બ્રહ્મભૂયકરં પૂર્ણં શ્ર્યોઙ્કારયશસાન્વિતમ્ ।
મમ પ્રિયકરં પૂર્ણં ભક્તિવર્ધનકં ભવેત્ ॥ ૬૧॥
ગણેશવચનં શ્રુત્વોચતુઃશ્ર્યોઙ્કારકૌ પરમ્ ।
ગણેશભક્તિસંયુક્તો ભક્તેશં ભક્તવત્સલમ્ ॥ ૬૨॥

ઇતિ શ્ર્યોઙ્કારાકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૬ । ૮.૬ ૪૯-૬૨॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 6 . 8.6 49-62..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Shryonkarakrita*
pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*